दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णचतुर्थी
माघ 23 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-105 | 1 | फरवरी 05, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 राजस्व-हानि-अनुदानस्य स्थगनविषये बजट-सत्रात् पूर्वं 'विशेष-सत्रं' आहूयितुं सुक्खू-सर्वकारस्य सज्जता; मन्त्रिमण्डले भविष्यति निर्णयः

3 KKSU Ramtek - देवव्रत-रेखे भारतस्य ज्ञानपरम्परां वैश्विकस्तरे गौरवान्वितां कृतवान् - डॉ. अतुल वैद्यः

5 बालकथा चतुरः शशकः (चतुर खरगोश)


## विभिन्नेषु विषयेषु विपक्षस्य सदस्यानां कोलाहलेन

### लोकसभायाः कार्याचरणम् स्थगितम्

विभिन्नेषु विषयेषु सभायां विपक्षीय दलानां कोलाहलेन लोकसभायाः कार्याचरणं दिवस-पर्यन्ताय स्थगितम्। तृतीयस्य स्थगनस्य अनन्तरं सायं पञ्चवादने यदा सभा पुनः समागता, तदा काङ्ग्रेस्, टि. एम्. सी. इत्यादीनि विपक्षदलानि सर्वकारस्य विरुद्धं कोलाहलं कृत्वा केन्द्रे आगतवन्तः । पीठासीन अधिकारिणः आग्रहम् अपि व्यर्थ जातम्। अत्रान्तरे, राष्ट्रपतेः अभिभाषणस्य धन्यवाद-प्रस्तावस्य विषये राज्यसभायां चर्चा पुनः समारब्धा।

## एकीकृत-समर्थन-सेवाः प्रदातुं भारतं ब्रिक्स्-औद्योगिक-क्षमता-केन्द्रे सम्मिलितः अभवत्

सम्पूर्ण ब्रिक्स-देशेषु विनिर्माण उद्योगेभ्यः, सूक्ष्म-लघु-मध्यम-उद्यमाय च एकीकृत-समर्थन-सेवाः प्रदातुं भारतं ब्रिक्स्-औद्योगिक-सक्षमता-केन्द्रे सम्मिलितः। नवदेहल्याम् उद्योगप्रवर्धनविभागेन आन्तरिकव्यापारविभागेन च आयोजिते कार्यक्रमे सूचितं यत् भारतं बी. सी. आई. सी. मध्ये सम्मिलितः अभवत्। वाणिज्य-उद्योग-मन्त्रालयः अवदत् यत् राष्ट्रिय-उत्पादकता परिषद् (एन. पि. सि.) इतीदं ब्रिक्स्-औद्योगिक-क्षमतानां भारत-केन्द्रम् इति निर्दिष्टम् अस्ति । सः अवदत् यत् एन. पी. सी., बी. सी.आई. सी. इत्यनेन सह देशस्य सहभागितायाः नेतृत्वं करिष्यति तथा च क्षमता-निर्माणे, उत्पादकता-संवर्धने, उन्नत-विनिर्माण-पद्धतिं स्वीकर्तुं च योगदानं करिष्यति।

## राष्ट्रपतेः ओडिशा-राज्यस्य षड्दिवसीय यात्रा

**हिमसंस्कृतवार्ताः** - ओडिशा-राज्यस्य षड्दिवसीय यात्रावधौ राष्ट्रपतिः द्रौपदीमुर्मुः पवित्र पुरी-नगरं सम्प्राप्तवती, यत्र सा भगवतः जगन्नाथ-मन्दिरे पुजार्चनां कृत्वा पिण्डदानं कृतवती। प्रातःकाले राष्ट्रपतिः महत्त्वपूर्ण-धार्मिक महत्त्व-स्थले श्वेतगङ्गायां पिण्डदानानुष्ठानं कृतवती। ततः सा भगवान जगन्नाथमन्दिरं गत्वा प्रार्थनां पूजां च कृतवती। देवालययात्रायां राष्ट्रपतिना सह राज्यपालः डा. हरि बाबु कम्भम्पति, मुख्यमन्त्री मोहनचरण माझी च आस्ताम्। पुरी-नगरं गत्वा, राष्ट्रपतिः मयूरभञ्ज नगरं प्रति प्रस्थितवती,

## लोकसभायां विपक्षस्य विरोधप्रदर्शनस्य मध्ये केन्द्रमन्त्रिणा पीयूष गोयलेन भारत-अमेरिका-व्यापार-व्यवहारं प्रशंसितम्;



**हिमसंस्कृतवार्ताः** - केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष गोयलः अवदत् यत् ऐतिहासिकः भारत-अमेरिका-व्यापार-सन्धिः द्वयोः देशयोः मध्ये सम्बन्धान् सुदृढं कर्तुं, सप्तचत्वारिंशदधिक द्विसहस्रतम वर्षपर्यन्तं राष्ट्रं विकसितभारतं कर्तुं भारतस्य यात्राम् अग्रे नेतुं च महत्त्वपूर्णः पदाक्षेपो वर्तते। लोकसभायां प्रवदन् श्रीगोयलः अवदत् यत्, अस्मिन् व्यापारसमन्वये, भारतं संवेदनशीलक्षेत्रेषु विशेषतः कृषि-दुग्ध-क्षेत्रयोः च स्वहितानां रक्षणे सफलतया समर्थः अभवत्। अस्मिन् वर्षे फरवरी-मासस्य द्वितीये दिनाङ्के प्रधानमन्त्रिणा नरेन्द्रमोदिना अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन सह दूरभाषद्वारा अनेकेषु द्वैपाक्षिक-वैश्विक-विषयेषु च चर्चा कृता। श्री गोयलः अवदत् यत् वार्तायाः अनन्तरं राष्ट्रपतिः ट्रम्पः अमेरिकादेशे भारतीय वस्तुनां निर्यातशुल्कं अष्टादशप्रतिशतात् न्यूनीकर्तुं घोषितवान्। सः अवदत् यत्, अन्येषु अनेकेषु देशेषु अमेरिका-देशेन आरोपितस्य शुल्कस्य अपेक्षया एषः दरः तुलनात्मकरूपेण न्यूनास्ति। व्यापार-व्यवहारस्य लाभविषये श्रीगोयलः अवदत् यत्, संधिना लघु-मध्यम-उद्यमानां, एम. एस. एम. ई. इत्येतेषां, कुशल-कर्मचारिणां, उद्योगानां च कृते नूतनाः अवसराः उद्घाटिताः भविष्यन्ति। मन्त्रिणा सभायां सूचितं यत् प्रायः एकवर्षं यावत् बहुवारं चर्चायाः अनन्तरं, द्वैपाक्षिक-व्यापार-सन्धेः अनेकानि प्रमुखानि क्षेत्राणि चित्वा च अयं व्यवहारः सम्पन्नः अभवत् इति। मन्त्री अवदत् यत् अयं व्यवहारः विश्वस्य द्वयोः बृहत्तमयोः लोकतान्त्रिक देशयोः मध्ये सुदृढः सम्बन्धः प्रतिबिम्बयति । विपक्षीय-सदस्यानां कोलाहलस्य मध्ये श्रीगोयलः एतत् वक्तव्यं प्रदत्तवान्।

## सर्वकारः षड्विंशत्यधिक द्विसहस्रतम वर्षस्य मार्च-मासपर्यन्तं भारतं नक्सल-मुक्तं कर्तुं प्रतिबद्धः अस्ति - गृहराज्यमन्त्री नित्यानन्द रायः



गृहराज्यमन्त्री नित्यानन्द रायः उक्तवान् यत् सर्वकारः षड्विंशत्यधिक द्विसहस्रतम वर्षस्य मार्च-मासपर्यन्तं भारतं नक्सल-मुक्तं कर्तुं प्रतिबद्धः अस्ति तथा च अस्मिन् विषये प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे अनेके उपायाः कृताः सन्ति। राज्यसभायां प्रश्नकाले प्रत्युत्तरे सः अवदत् यत् एन. डी. ए-सर्वकारस्य नक्सलवादं विरुद्ध शून्य-सहिष्णुता-नीतिः अस्ति । सः अवदत् यत् नक्सलवादस्य उन्मूलनाय षट् प्रायोजितयोजनानां कार्यान्वयनाय दश सहस्रकोटिरूप्यकाणां प्रयोगः अभवत्। समाह्वानानां निराकरणे प्रारम्भिकसर्वकारस्य विफलतायाः प्रश्ने श्रीरायः अवदत् यत् चतुर्दशाधिक द्विसहस्रतमवर्षात् प्राक् केन्द्रसर्वकारस्य अनुसारं दायित्वं केन्द्रसर्वकारस्य न, अपितु राज्य सर्वकारस्य आसीत्।

## प्रधानमन्त्री नरेन्द्रमोदी फरवरीमासस्य सप्त-अष्ट-दिनांकयोः मलेशिया-देशस्य आधिकारिकयात्रां गमिष्यति।



मलेशिया-देशस्य प्रधानमन्त्रिणः अन्वर इब्राहिम इत्यस्य आमन्त्रणे प्रधानमन्त्री नरेन्द्रमोदी फरवरी सप्त-अष्ट-दिनांकयोः मलेशिया-देशस्य आधिकारिकयात्रां भविष्यति। चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य अगस्त-मासस्य भारत-मलेशिया-द्वैपाक्षिक-सम्बन्धस्य 'व्यापक-सामरिक-सहभागित्वस्य उन्नतेः अनन्तरं प्रथमम् अपि च मलेशिया-देशस्य प्रधानमन्त्रिणः मोदिनः एतत् तृतीयं भ्रमणम् भविष्यति। विदेशमन्त्रालयः अवदत् यत् यात्रायाः समये प्रधानमन्त्री मलेशिया-देशस्य समकक्षीयेन सह द्वैपाक्षिकं चर्चा करिष्यति।

## सुभाषितम्

**धनिकः श्रोत्रियो राजा,**
**नदी वैद्यस्तु पञ्चमः।।**
**पञ्च यत्र न विद्यन्ते,**
**न तत्र दिवसं वसेत्।।**

भावार्थः- जिस स्थान में धनवान्, व्यापारी, वेदशास्त्रों में निपुण ब्राह्मण, एक सक्षम राजा (शासक), एक सदानीरा नदी तथा चिकित्सा हेतु वैद्य, ये पांचों उपलब्ध न हों, ऐसे स्थान में एक दिन के लिए भी निवास नहीं करना चाहिए।






## दिल्ली, पञ्जाब, हरियाणा, चण्डीगढ, उत्तराखण्ड, बिहार इत्येतेषु प्रदेशेषु सघन-निहराच्छादनस्य पूर्वानुमानं प्रकटितम्

भारत-ऋतु-विभागेन, आई. एम. डी. इत्यनेन अद्य दिल्ली, पञ्जाब, हरियाणा, चण्डीगढ, उत्तराखण्ड, बिहार इत्येतेषु प्रदेशेषु सघन-निहराच्छादनस्य पूर्वानुमानं प्रकटितम्। ऋतु-विभागेन अद्य हिमाचलप्रदेशे, मध्यप्रदेशे, पूर्वी-उत्तरप्रदेशे, पश्चिमी-उत्तरप्रदेशे, उप-हिमालयी-पश्चिमवङ्ग-प्रदेशे,सिक्किम-प्रदेशे च एतादृशीः स्थितेः संभावना प्रकटिता अस्ति। अगामि दिनद्वयोः जम्मू-कश्मीर, लद्दाख, गिल्गिट-बाल्टिस्तान, मुज़फ़्फ़राबाद,हिमाचल-प्रदेश, उत्तराखण्ड इत्येतेषु प्रदेशेषु विद्युद्योतनेन सह हिमपातस्य सम्भावना

# राजस्व-हानि-अनुदानस्य स्थगनविषये बजट-सत्रात् पूर्वं 'विशेष-सत्रं' आह्वयितुं सुक्खू-सर्वकारस्य सज्जता; मन्त्रिमण्डले भविष्यति निर्णयः




**हिमसंस्कृतवार्ताः - शिमला।** केन्द्रसर्वकारेण राजस्व-हानि-अनुदानस्य (Revenue Deficit Grant) समाप्तिकरणस्य गम्भीरविषये चर्चां कर्तुं हिमाचलप्रदेश-विधानसभायाः 'विशेष-सत्रस्य' आयोजनस्य सिद्धता आरब्धा। अस्य सत्रस्य निर्णयः ८ फरवरी दिनाङ्के प्रस्ताविते मन्त्रिमण्डलस्य (Cabinet) उपवेशने स्वीकरिष्यते। अनुमानम् अस्ति यत् इदं सत्रं १५ फरवरी दिनाङ्कतः परं कदापि भविष्यति, तदनन्तरमेव नियमित-बजट-सत्रं भविष्यति।

**मुख्य-वित्तीय-सङ्कटम्**

१६-तमे वित्त-आयोगेन ३१ मार्च २०२६ दिनाङ्कात् परं हिमाचलस्य आरडीजी (RDG) पूर्णतः स्थगयितुं प्रावधानं कृतम्। इयं राशिः राज्यस्य राजस्व-हानि-पूरणाय मुख्यः आधारः आसीत्।

**विगत-तथ्यानि**

१५-तमे वित्त-आयोगे (२०२१-२६) राज्याय कुल ३७,१९९ कोटिरूप्यकाणां अनुदानं स्वीकृतम् आसीत्।

**वर्तमान-स्थितिः** राज्यस्य प्रायः ६० प्रतिशतं धनं वेतन-निवृत्तिवेतन-ऋण-शोधनेषु एव व्ययीभवति। अनुदानस्य समाप्त्या विकासकार्याणि बाधितानि भविष्यन्ति।

## सत्रस्य उद्देश्यानि विषयाः च

मुख्यमन्त्री इच्छति यत् सत्तापक्षः विपक्षः च मिलित्वा विधानसभायां अस्य विषयस्य गम्भीरतया चर्चां कुर्वन्तु तथा च केन्द्रसर्वकारं प्रति सुदृढां रणनीतिं प्रस्तौतु। पञ्जाब-हरियाणा-राज्याभ्यां सह जल-विवादः, 'भाखड़ा-ब्यास प्रबन्धन बोर्ड' (BBMB) इत्यस्य लम्बिताः विषयाः अपि अस्मिन् सत्रे उत्थापयिष्यन्ते। राष्ट्रिय-कोषे हिमाचलस्य अंशः १ प्रतिशततः अपि न्यूनः जातः, यः हरियाणा-उत्तराखण्ड-गोवा-सदृश-राज्यानामपि अपेक्षया न्यूनः अस्ति।

## संसाधन-सङ्कलनस्य प्रयासाः

वित्तविभागेन वित्तकोषैः (Banks) सह सम्पर्कं कृत्वा निर्दिष्टं यत् यानि सर्वकारीय-संख्याः (Accounts) निष्क्रियाः (Inactive) सन्ति, तत्र स्थितं धनं तत्क्षणमेव राजकीय-कोषे स्थानान्तरितं भवतु। वित्त-सचिवः अभिषेक जैनः अवदत् यत् एतेन धनस्य उचितं लेखा-परीक्षणं (Audit) बजट-प्रबन्धनं च भविष्यति।

# भाजपा-पक्षस्य ४ लोकसभानिर्वाचितानां ३ राज्यसभा-सदस्यानां च 'पृष्ठवंशः' नास्ति : विक्रमादित्यसिंहः



**हिमसंस्कृतवार्ताः - ऊना।** ऊना-नगरं सम्प्राप्तः लोकनिर्माणमन्त्री विक्रमादित्यसिंहः प्रसारमाध्यमानां प्रश्नानां उत्तरं ददन् अवदत् यत् भाजपा-पक्षस्य लोकसभयाः चत्वारः राज्यसभायाः च त्रयः सांसदाः सन्ति, परन्तु तेषां 'पृष्ठवंशः' (Spine) एव नास्ति। सः अवदत् यत् एते सांसदाः स्वपौरुषं दर्शयन्तु तथा च केन्द्रसर्वकारेण यः 'राजस्व-हानि-अनुदानम्' (Revenue Deficit Grant) स्थगितं कृतं, तस्य निर्णयस्य विरुद्धं स्वस्वरं दृढतया उत्थापयन्तु।हिमाचलस्य हितम् अयं विषयः कस्यचित् दलस्य वा नेतुः वा नास्ति, अपितु हिमाचलस्य 'हिमाचलियत' इत्यस्य च अस्ति। नेतारः तु आगमिष्यन्ति गमिष्यन्ति च, परन्तु ज्वलन्तः विषयाः न विनश्यन्ति। असौ अकथयत् यत् विवरणानाम् अनुसारं हिमाचलस्य ५०,००० कोटिरूप्यकाणां हानिः अभवत्। एषः अतीव चिन्तायाः विषयः अस्ति। एतदर्थं मन्त्रिमण्डलस्य उपवेशनं आहूतं तथा च विशेष-सत्रस्य आयोजनं अपि क्रियते।

**दुर्भाग्यपूर्ण-निर्णयः** हिमाचलस्य राज्यसङ्घटनात् आरभ्य एतत् अनुदानं लभ्यते स्म। केन्द्रसर्वकारेण ७५ लक्षजनानां हितानां हननं कृतम् अस्ति।

## राज्यसभा-निर्वाचनविषये: शीर्षनेतृत्वं करिष्यति निर्णयः

राज्यसभा-निर्वाचनस्य प्रश्ने सः अवदत् यत् "गतेन किं प्रयोजनम्" (पीछे जो हुआ सो हुआ)। सः स्पष्टीकृतवान् यत् एतत् केवलं निर्वाचनं न अपितु एकं 'नाम-निर्देशनम्' (Nomination) भवति। यस्य दलस्य बहुमतं भवति, तस्यैव प्रतिनिधिः निर्वाचितः भवति। हिमाचलप्रदेशे काङ्ग्रेस-दलस्य पूर्ण-बहुमतं वर्तते, अतः 'शीर्षनेतृत्वेन' यस्य नाम निश्चितं करिष्यते, मुख्यमन्त्रिणः नेतृत्वे सर्वे विधायकाः तस्यैव समर्थनं करिष्यन्ति।

# हिमाचलप्रदेशे १९ वर्षाण्यतीतानि, तथापि कटासनी क्रीडाङ्गणम् अपूर्णमेव; १७ कोटिरूप्यकव्ययः, पञ्च सर्वकार-परिवर्तनानि, स्वप्नपरियोजना सञ्चिकासु एव सीमिता



**हिमसंस्कृतवार्ताः शिमला।** पर्वतीयप्रदेशस्य मध्ये क्रीडाप्रतिभानां संवर्धनाय महान् स्वप्नं वहन् आरब्धः कटासनी बहुउद्देशीयः क्रीडाङ्गणपरियोजना अद्य स्वस्यैव अस्तित्वरक्षणार्थं सङ्घर्षं कुर्वती दृश्यते। यस्याः परियोजनायाः माध्यमेन प्रदेशीयक्रीडकाः राष्ट्रिय-अन्तरराष्ट्रीयस्तरे ख्यातिं प्राप्स्यन्तीति आशा आसीत्, सा अधुना केवलं शासकीयसञ्चिकासु अपूर्णसंरचनासु च एव संकुचिता अस्ति। अष्टतलात्मकः अपूर्णम् प्रारुपम् व्यवस्थाविफलतायाः मूकं साक्ष्यं वहति। यत्र उच्चस्तरीयप्रशिक्षणस्य परिकल्पना कृता आसीत्, तत्र अद्य जीर्णाः भित्तयः, उन्मूलिताः लोहशलाकाः, सर्वत्र विकीर्णा महती निर्माणसामग्री च दृश्यन्ते। १९ वर्षाणि व्यतीतानि सन्ति, तथापि कटासनी बहुद्देशीयक्रीडाङ्गणस्य स्वप्नं अद्यापि यथार्थं न जातम्।मङ्गलवासरे स्थलं निरीक्ष्य ज्ञातं यत् निर्माणाधीनस्य षट्तलात्मकभवनस्य अधिकांशः भागः जलवायोः अवधानहीनतायाश्च कारणेन नष्टः अभवत्। अपूर्णनिर्माणस्य समीपे क्षुपाः विकसिताः सन्ति। लक्षरूप्यक-मूल्ययुक्ता यन्त्रसामग्री जंगग्रस्तत्वेन अनुपयोग्या जाता। अत्र असामाजिकतत्त्वानां वासविषये अपि आक्षेपः वर्धन्ते। कटासनी बहुद्देशीयक्रीडाङ्गणार्थं ४५ बीघा भूमेः स्थानान्तरणे एव ११ वर्षाणि व्यतीतानि। ततः अपि परियोजना गत्याः अभावं नात्यजत्। २००७ तमे वर्षे तात्कालिकमुख्यमन्त्री वीरभद्रसिंहः शिमलानिकटे अस्य स्वप्नपरियोजनायाः आधारशिलां न्यधात्। परियोजनाकाले कदाचित् भूमेः अभावः अभवत्, कदाचित् रूपरेखायां प्रश्नाः उदभवन्। कदाचित् एथलेटिक्सक्रीडाङ्गणनिर्माणस्य विचारः अभवत्, कदाचित् शूटिङ्गरेञ्ज्, कदाचित् केवलं अन्तःक्रीडासु सीमितकरणस्य प्रस्तावाः आगताः।

प्रत्येकं नवीनसर्वकारेण नवीनयोजना रचिता, किन्तु कार्यं अग्रे न गतम्। एतेषु १९ वर्षेषु काङ्ग्रेस् तथा भाजपयोः पञ्च सरकाराः आगताः गताश्च, किन्तु क्रीडाङ्गणस्य सञ्चिकाः कार्यालयात् बहिर्गन्तुं न अशक्नुवन्। व्यवस्थाविफलता, विभागीयसमन्वयाभावः, योजनानां पुनःपुनः परिवर्तनं च निर्माणव्ययं अत्यधिकं कृतवन्तः। परिणामतः १७ कोटिरूप्यकव्ययस्य पश्चात् अपि परियोजना अधरमध्ये एव अवतिष्ठते। विभागीयाधिकारिणां कथनानुसारं व्ययवृद्धेः अनन्तरं योजनापरिवर्तनं कृतम्, किन्तु तेन सह क्रीडाङ्गणं शनैः शनैः सरकारस्य प्राथमिकतासूच्याः बहिः गतम्। अधुना ७५ बीघाभूमौ प्रस्तावितस्य नवीनबहुद्देशीयक्रीडाङ्गणस्य व्ययः प्रायः ५५ कोटिरूप्यकाः आकलिताः सन्ति, किन्तु अस्यापि कृते स्पष्टः कार्यमार्गः न दृश्यते।

## क्रीडानीतेः कार्यप्रणाल्याः च प्रश्नानां प्रतीकं जातम् अपूर्णभवनम्

स्थले प्राप्ताः युवानः प्रविणकुमारः महेशवर्मा च अवदन्— एतत् केवलं क्रीडाङ्गणं न, अपि तु युवानां भविष्यस्य प्रश्नः अस्ति। यदि समये एव कार्यं सम्पन्नम् अभविष्यत्, तर्हि अद्य शिमलासमीपे क्रीडकानां कृते उत्तमाः सुविधाः उपलब्धाः अभविष्यन्। नियमिताभ्यासस्य, आधुनिकसाधनानां, प्रतियोगितानां च अभावेन अनेकाः प्रतिभाः वा नगरात् बहिर्गन्तुं विवशाः सन्ति, अथवा क्रीडां मध्ये एव परित्यजन्ति। अन्यः युवा मुकेशशर्मा अवदत्— वयं प्रतिदिनम् अत्र गच्छामः, क्रीडाङ्गणं दृष्ट्वा आशा अपि जागर्ति, निराशा अपि। एतेषु वर्षेषु अद्यापि क्रीडनस्य अवसरः न प्राप्तः। युवानां कथनानुसारं कटासनी बहुउद्देशीयक्रीडाङ्गणं अद्य केवलं अपूर्णभवनं न, अपि तु प्रदेशस्य क्रीडानीतेः कार्यप्रणाल्याः च उपरि स्थितानां प्रश्नानां प्रतीकं जातम्।

### शीघ्रं आरभ्यते शूटिङ्ग तथा बॉक्सिङ्ग प्रशिक्षणम् : गोमा

काङ्ग्रेस् सर्वकारः क्रीडाङ्गणविषये पूर्णतया गम्भीरा अस्ति। पूर्वसर्वकारेषु यत् किमपि अभवत्, तत् विस्मृत्य अग्रे गन्तुं समयः आगतः। शीघ्रमेव क्रीडाङ्गणस्य त्रयस्तलानि सज्जीकृत्य शूटिङ्गरेञ्ज् तथा बॉक्सिङ्ग प्रशिक्षणम् आरभ्यते। चरणबद्धरीत्या अन्याः अपि क्रीडाक्रियाः प्रारभ्यन्ते।

### मार्चमासे चतुर्कोटिरूप्यकव्ययेन कार्यस्य निविदा भविष्यति : विक्रमादित्यः

कटासनी बहुउद्देशीयक्रीडाङ्गणनिर्माणस्य यत् स्वप्नं पूर्वमुख्यमन्त्री दिवङ्गतवीरभद्रसिंहः अददर्शत्, तत् अवश्यमेव पूर्णं करिष्यते। लोकनिर्माणविभागेन मार्चमासे चतुर्कोटिरूप्यकव्ययेन शूटिङ्गरेञ्ज् तथा बॉक्सिङ्ग रिङ्ग निर्माणार्थं निविदा प्रकाश्यते। अस्य निर्माणस्य विषये सः सततं सर्वैः सम्बद्धविभागैः सह सम्पर्के अस्ति।
— विक्रमादित्यसिंहः, लोकनिर्माणमन्त्री

# KKSU Ramtek - देवव्रत-रेखे भारतस्य ज्ञानपरम्परां वैश्विकस्तरे गौरवान्वितां कृतवान् - डॉ. अतुल वैद्यः



## वेदमूर्ति-देवव्रत-रेखे विश्वविद्यालयेन "वेदनिधि" उपाधिना अलङ्कृतः

**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, नागपुरम्।** कविकुलगुरुकालिदाससंस्कृत-विश्वविद्यालयस्य वेदविद्यासङ्काय-व्याकरणविभागाभ्यां प्राच्यविद्याविदुषः स्वर्गीय-डॉ.-सदाशिव-डाङ्गे महोदयस्य स्मृतौ प्रतिवर्षं व्याख्यानमाला आयोज्यते। अस्मिन् अवसरे विभिन्नशास्त्राणां विदुषां सम्मानमपि क्रियते। अस्यां शृङ्खलायां शुक्लयजुर्वेदस्य दण्डक्रम-पारायणकर्तुः वेदमूर्ति-देवव्रत-रेखे महोदयस्य सम्मानं ३.२.२६ दिनाङ्के अभवत्।

### कार्यक्रमाध्यक्षता साफल्यं च

कार्यक्रमाध्यक्षता माननीयेन कुलगुरुणा डॉ. अतुल वैद्य महोदयेन कृता। मञ्चे प्रख्याताः वेदमूर्तयः पण्डित-कृष्णशास्त्री आर्वीकर, पण्डित-निलेश केदार, वेदविद्यासङ्कायस्य अधिष्ठाता प्रो. हरेकृष्ण अगस्ती तथा व्याकरणविभागाध्यक्षः डॉ. जयवन्त चौधरी उपस्थिताः आसन्।

### दण्डक्रम-पारायणस्य वैशिष्ट्यम्

दुर्लभा विधाः - अहिल्यानगर (महाराष्ट्र) निवासी १९ वर्षीयः देवव्रत रेखे महोदयः वाराणस्यां शुक्लयजुर्वेदस्य अतीव कठिनं 'दण्डक्रम-पारायणम्' सफलतापूर्वकं पूर्णं कृतवान्।

२. ऐतिहासिकम् उपलब्धम्:- विगत २०० वर्षेषु एतादृशस्य पारायणस्य उल्लेखः दुर्लभः अस्ति। एषा साधना वैदिकपरम्परायाः अद्वितीया उपलब्धिः मन्यते।

३. श्रुतिपरम्पराः:- वेदमूर्ति-निलेश केदार महोदयः अवदत् यत् दण्डक्रम-पारायणं श्रुतिपरम्परायाः देयम् अस्ति। देवव्रतः एतां साधनां स्वस्य गुरुपरम्परायै मातृस्मृतये च समर्पितवान्।

### "वेदनिधि" उपाधिः सम्मानम्।

विश्वविद्यालयपक्षतः कुलगुरु-डॉ.-अतुल-वैद्य-महोदयस्य करकमलैः मन्त्रोच्चारपूर्वकं देवव्रताय निम्नलिखित-वस्तूनि समर्पितानिः
"वेदनिधि" उपाधिः।
₹२१,०००/- नगदराशिः।
महावस्त्रं, चन्दनहारः, स्मृतिचिह्नं च।

### अध्यक्षीय-विचारः

कुलगुरुः डॉ. अतुल वैद्यः अवदत् यत् – "वेदनिधि-देवव्रतस्य रूपेण साक्षात् वेदपुरुषस्य अवतरणम् अभवत्। सः भारतस्य ज्ञानपरम्परां वैश्विकस्तरे गौरवान्वितां कृतवान्।" कार्यक्रमे देवव्रतः यजुर्वेदस्य केषाञ्चन मन्त्राणां दण्डक्रम-पारायणं प्रस्तुतवान्, यत् श्रुत्वा उपस्थिताः विद्वांसः मन्त्रमुग्धाः अभवन्। कार्यक्रमस्य सञ्चालनं डॉ. सुमित कठाळे महोदयेन, आभारप्रदर्शनं च डॉ. जयवन्त चौधरी महोदयेन कृतम्। शान्तिमन्त्रेण सह कार्यक्रमस्य समापनम् अभवत्।

# नूतना 'आवश्यक-औषधि-सूची' सज्जीकुर्वन्तु; मुख्यमन्त्री सुक्खूः अधिकारिभ्यः निर्दिष्टवान्



हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू महोदयः मङ्गलवासररात्रौ स्वास्थ्यविभागस्य समीक्षा-उपवेशने अधिकारिणः आदिष्टवान् यत् राजकीय-स्वास्थ्यसंस्थासु रोगिभ्यः गुणवत्तापूर्ण-औषधीनां उपलब्धतां सुनिश्चितं कर्तुं नूतना 'आवश्यक-औषधि-सूची' (Essential Drugs List) सज्जीक्रियताम्। सः अवदत् यत् अस्याः सूच्याः समीक्षा एका उच्चस्तरीया समितिः करिष्यति।

**निर्णयस्य प्रमुखाः बिन्दवः**

१. साक्षात्-क्रयणम् (Direct Purchase): - औषधीनां क्रयणं साक्षात् निर्मातृ-कम्पनीभ्यः (Manufacturers) भविष्यति। अनेन मध्यस्थानां (Middlemen) प्रभावः समाप्स्यते तथा च आपूर्ति-शृङ्खलायां पारदर्शिता आगमिष्यति।

२. गुणवत्ता-परीक्षणम् (Quality Check): - औषधीनां प्रतिरूप-सङ्कलनस्य (Sampling) गुणवत्ता-निरीक्षण-व्यवस्था च सुदृढा भविष्यति।

३. विशिष्ट-प्रकोष्ठः (Dedicated Cell):- प्रत्येकस्मिन् चिकित्सा-महाविद्यालये औषध-गुणवत्ता-निरीक्षणार्थं एकः विशिष्ट-प्रकोष्ठः (Cell) स्थापयिष्यते। प्रथमचरणे 'आईजीएमसी' (IGMC) शिमला तथा 'टाण्डा' (Tanda) चिकित्सालययोः अस्य स्थापना भविष्यति।

४. कठोर-नियमाः (Strict Regulations): - मुख्यमन्त्रिणा निर्दिष्टं यत् हिमाचलप्रदेशे औषधि-निर्मातृ-कम्पनीनां कार्यप्रणाल्यां भारतस्य 'औषधि एवं प्रसाधन सामग्री नियम १९४५' इत्यस्य 'अनुसूची-एम' (Schedule-M) इत्यस्य प्रावधानं कठोरतया पालनीयम्। सः स्पष्टीकृतवान् यत् रोगिणां स्वास्थ्येन सह किमपि सहमतिः न भविष्यति। अस्मिन् उपवेशने स्वास्थ्य-सचिवः एम. सुधा देवी, विशेष-सचिवः अश्विनी कुमारः, आयुष-निदेशकः निपुण जिन्दलः, चिकित्सा-शिक्षा-निदेशकः डॉ. राकेश शर्मा तथा अन्ये वरिष्ठाधिकारिणः उपस्थिताः आसन्।

## हिमाचलप्रदेशे पुनः हिमपातः वर्षा चः 'पीत-सतर्कता' (यलो अलर्ट)

उद्घोषिताहिमाचलप्रदेशे पुनः एकदा हिमपातस्य वृष्टेः च 'पीत-सतर्कता' (यलो अलर्ट) प्रसारिता अस्ति। राज्यस्य उच्चशिखरयुक्तेषु क्षेत्रेषु फरवरी-मासस्य षष्ठे दिनाङ्के वर्षायाः हिमपातस्य च सम्भावना प्रकटीकृता। फरवरी-मासस्य नवमे दिनाङ्के राज्ये पुनः एकवारं 'पश्चिमी विक्षोभ' (Western Disturbance) सक्रियः भविष्यति। अस्य विक्षोभस्य प्रभावेण फरवरी-मासस्य नवमे दशमे च दिनाङ्के राज्ये पुनः वर्षा-हिमपातयोः पीत-सतर्कता दत्ता अस्ति।राज्यस्य उच्चपर्वतीयक्षेत्रेषु अस्मिन् समये हिमपातः, निम्नक्षेत्रेषु च वर्षा भवितुम् अर्हति। शिमला-स्थित-मौसमविभागात् प्राप्तसूचनानुसारं गुरुवासरे राज्ये वातावरणं स्वच्छं भविष्यति। फरवरी-मासस्य सप्तमे अष्टमे च दिनाङ्के अपि राज्यस्य अधिकांशभागेषु आकाशः निर्मलः स्थास्यतीति पूर्वानुमानं वर्तते।विगतेषु २४ घण्टासु हिमाचलप्रदेशस्य बहुषु स्थानेषु ऋतुपरिवर्तनं दृष्टम्। केषुचित् क्षेत्रेषु अल्पा वर्षा हिमपातः च अभवत्, येन कारणेन तापमानस्य न्यूनता अपि अभवत्।




# एलन मस्कः विश्वस्य प्रथमः '८५० बिलियन' (८५० अरब) डॉलरपरिमितः धनकुबेरः, एकस्मिन् दिने सप्तलक्षकोटि-रूप्यकाणां सम्पत्तिवृद्धिः

हिमसंस्कृतवार्ता। टेस्ला-स्पेसएक्स इत्येतयोः मुख्यकार्यकारी अधिकारी (CEO) एलन मस्कः वैश्विक-व्यापार-इतिहासस्य नूतनम् अध्यायं रचितवान्। 'फोर्ब्स' इत्यस्य अनुसारं, एलन मस्कः अधुना ८०० अरब-डॉलरतः अधिकां निवल-सम्पत्तिं (Net worth) प्राप्तवान् विश्वस्य प्रथमः पुरुषः जातः। एषः कीर्तिमानः तस्य रॉकेट-संस्था 'स्पेसएक्स' तथा कृत्रिम-बुद्धि-संस्था 'एक्सएआई' (xAI) इत्यनयोः सद्यः जातस्य विलयस्य कारणेन अभवत्।अस्मिन् विलये संयुक्त-इकाई-मूल्याङ्कनं प्रायः १.२५ ट्रिलियन-डॉलरपरिमितं निर्धारितम् अस्ति। अनया सम्मत्या एलन मस्कस्य वैयक्तिक-सम्पत्तौ एकस्मिन् दिने प्रायः ८४ अरब-डॉलर (७ लक्षकोटि-रूप्यकाणि) परिमिता वृद्धिः जाता, तस्य कुल-सम्पत्तिः च प्रायः ८५२ अरब-डॉलर (प्रायः ७७ लक्षकोटि-रूप्यकाणि) अभवत्। केवलं चतुर्षु मासेषु मस्कस्य सम्पत्तिः ७० प्रतिशतं संवर्धिता। अक्तूबर २०२५ तमे वर्षे एषा ५०० अरब-डॉलर आसीत्। अधुना तस्य सम्पत्तिः पाकिस्तान-श्रीलङ्का-बाङ्गलादेश-नेपाल-देशानां सकल-घरेलु-उत्पादात् (GDP) अपि अधिका अस्ति। एषा भारतस्य शीर्ष-४० धनिकानां कुल-सम्पत्तेः अपि अधिका वर्तते।

### चतुर्षु मासेषु चत्वारः ऐतिहासिक-सोपानाः

अक्तूबर २०२५: ५०० अरब-डॉलर सीमां तीर्णवान्।
दिसंबर २०२५: ६०० अरब-डॉलर परिमितं प्राप्तवान्।
दिसंबर २०२५ (अन्ते): ७०० अरब-डॉलरतः अधिकम्।
फरवरी २०२६: ८०० अरब-डॉलरतः अधिका निवल-सम्पत्तिः।
शीर्ष-पञ्च (Top-5) धनिकाः
१. एलन मस्क २. लैरी पेज ३. सर्गी ब्रिन ४. जेफ बेजोस ५. मार्क जुकरबर्ग

# केन्द्रीय- संस्कृत- विश्वविद्यालयस्य मुक्तस्वाध्यायपीठस्य संस्कृताध्ययन- कार्यक्रमाङ्गतया इण्डोनेशिया- राष्ट्रस्य बालीस्थे द्वीपान्तरसंस्कृतप्रतिष्ठाने द्वादशदिवसीयं संस्कृतसम्भाषणशिबिरं समायोजितम्



यः कोऽपि संस्कृतानुरागिजनः संस्कृत- सम्भाषण- शिबिरं प्रविश्य केवलं दशदिवसेषु प्रतिदिनं घण्टाद्वयम् आहत्य विंशतिघण्टासु सरलसंस्कृतेन सम्भाषणं कर्तुं समर्थः भवति। अतः एतत्प्रयोगेण सिद्धयति यत् सरलसंस्कृतेन सम्भाषणं शक्यम्। संस्कृतं सरलं सरसं बोधगम्यं सम्भाषणयोग्यं च वर्तते। संस्कृतं सर्वेषाम्। संस्कृतं सर्वत्र। विश्वस्य हितं संस्कृते सन्निहितम्- आचार्यः विशालप्रसादभट्टः

श्रीमार्कण्डेयगुरुकुलम्, बाली, इण्डोनेशिया इत्यत्र केन्द्रीय- संस्कृत- विश्वविद्यालयस्य मुक्तस्वाध्यायपीठस्य संस्कृताध्ययन- कार्यक्रमाङ्गतया जनवरीमासस्य षड्दिनाङ्कादारभ्य षोडशदिनाङ्कं यावत् द्वादशदिनात्मकं संस्कृतसम्भाषणशिबिरं सुसम्पन्नम्। शिबिरेऽस्मिन् बालीस्थाः शिक्षकाः, उद्योगिनः, पुरोहिताः, अर्चकाः, गृहिण्यः इत्यादयः आहत्य उपविंशतिसङ्ख्याकाः संस्कृतजिज्ञासवः जनाः सोत्साहं सश्रद्धञ्च भागं गृहीतवन्तः। शिबिरशिक्षकत्वेनात्र आचार्यः विशालप्रसादभट्टः द्वादशदिनानि यावत् प्रतिदिनं सायंकाले घण्टाद्वयं रोचकतया, सरलविधिना, प्रत्यक्षरूपेण च समुपस्थितान् संस्कृतानुरागिजनान् संस्कृतसम्भाषणं शिक्षितवान्। शिबिरेऽस्मिन् सर्वेऽपि शिबिरार्थिनः साभिनयं संस्कृतगीत- कथा- क्रीडा- वस्तुप्रदर्शन- स्फोरकपत्र- प्रक्षेपकयन्त्र- प्रयोगादिभिः विविधमाध्यमैः रुचिपूर्वकं च संस्कृतसम्भाषणस्य प्रशिक्षणं प्राप्तवन्तः। जयतु संस्कृतं विश्वपोषकम्।

# चेचट-स्थिते राजकीये उच्चमाध्यमिकविद्यालये काव्यसन्ध्यायाः आयोजनम्




रामगञ्जमण्डी। अखिलभारतीयसाहित्यपरिषदः तत्वावधाने रविवासरे चेचट-स्थिते राजकीये उच्चमाध्यमिकविद्यालये काव्यसन्ध्यायाः आयोजनम् अभवत् । अस्मिन् साहित्यगङ्गायाम् अनेके क्षेत्रीयाः साहित्यकाराः स्नानम् अकुर्वन् । कार्यक्रमस्य अध्यक्षताम् अकरोत् वरिष्ठः कविः साहित्यकारश्च, अखिलभारतीयवाल्मीकिमहासभायाः राष्ट्रीयाध्यक्षः श्रीरामगोपालराजा । मुख्यातिथिः आसीत् वरिष्ठः साहित्यकारः कविः शिक्षकश्च श्रीअञ्जनीकुमारशर्मा । कार्यक्रमारम्भः अतिथिभिः मातुः शारदायाः समक्षे दीपप्रज्वलनेन पुष्पार्पणेन च अभवत् । परिषदः जिल्लासंयोजकः श्रीआशुतोषशर्मा सहजिल्लासंयोजकश्च श्रीमहेशयादवः ‘मधुरः’ अतिथीनाम् माल्यार्पणेन स्वागतम् अकुरुताम् ।उदयोन्मुखः कविः अङ्कुशसेनः सरस्वतीवन्दनया स्वकीयया ‘भगवा’ कवितया च कार्यक्रमम् आरभत । अनन्तरं कविः आशुतोषः परिषद्गीतम् "भारतीकीलोकमङ्गलसाधना साकार हो" गीतवान् । नवोदितः कविः प्रदीपमीणः देशभक्तिपूर्णाम् रचनाम् "वतनपर मिटनेवालोंको..." "मत करो र भाइयों हिंसा..." "असो काई जमानो आग्यो रै..." इत्यादिकाः प्रभावपूर्णाः रचनाः श्रावयित्वा श्रोतॄन् आह्लादितवान् ।कविः अशोकाहीरः भक्तिगीतम् "कब आवोगे मेरे राधारमण..." हाड़ौतीशृङ्गारगीतञ्च "छोरी थारो नाम बता दे..." सस्वरं पठित्वा प्रशंसाम् अलभत । कविः सौदानसिंहः स्वस्य मर्मस्पर्शिनीम् रचनाम् "लम्बा चलनेके बाद..." पठित्वा करतलध्वनिम् अजयत ।कविः भुवनेशमाली उत्कृष्टाः रचनाः "मिथ्या कमी दिखा ग्रन्थों में...", "कोई खतरेमें है संविधानके नामपर...", "किस बातकी है देरी इंसाफ में..." इत्यादिकाः अशृणोत् । कविः राधेश्याममाली मधुरं गीतम् "बनकर मधुर ताल..." पठित्वा सर्वेषाम् हृदयानि जग्राह । कविः महावीरजङ्गमः भावप्रधानाः रचनाः "मन्दिर और मस्जिद में...", "तुम्हारी हमारी हथेलीकी रेखा...", "तड़के दफेर..." श्रावयित्वा सभाम् भावविभोराम् अकरोत् ।परिषदः सहजिल्लासंयोजकः महेशयादवः ‘मधुरः’ पेपरलीक-ओएमआर-घोटालापर "तरह–तरहका आग्या चोल्डा..." इति व्यङ्ग्यरचनाम्, महाराणाप्रताप-छत्रपतिशिवाजीमहाराज-सनातनधर्म-बाङ्ग्लादेशे हिन्दूनाम् उपरि अत्याचारान् विषयीकृत्य च रचनाः पठित्वा सभ्यान् मन्त्रमुग्धान् अकरोत् । मञ्चसंचालकः भावेशलोहानी "कृष्ण चलकर आयेंगे दरबारसे..." इति कवितां पठित्वा प्रशंसाम् अलभत ।परिषदः जिल्लासंयोजकः आशुतोषशर्मा "चल कहीं भी चल" इति कवितां पठित्वा ‘आत्मबोधतः विश्वबोधः’, पञ्चपरिवर्तनम्, भविष्यकाले साहित्यविमर्शः, साहित्यस्य आवश्यकता लाभाश्च इति विषयेषु विस्तृतं चर्चाम् अकारयत् ।मुख्यातिथिः अञ्जनीकुमारशर्मा "मिल जाएँ सबको राम अबके फागुन में...", "बसन्ती चाल्यो बायरो..." इति मनोहररचने अशृणोत् । अध्यक्षः रामगोपालराजा "मैं एक अकेला हूँ..." इति हृदयस्पर्शिनीं कवितां पठित्वा अविरलां करतलध्वनिम् अलभत ।दीर्घरात्रिपर्यन्तम् अस्याम् साहित्यसभायाम् सर्वेभ्यः सदस्येभ्यः स्मृतिचिह्नरूपेण डायरी-कलमयोः उपहाराः दत्ताः । अन्ते सहजिल्लासंयोजकः महेशः ‘मधुरः’ सर्वेषाम् आभारम् अज्ञापयत् परिषदि अधिकाधिकसदस्यानाम् संयोजनस्य आवश्यकतां च उक्त्वा कल्याणमन्त्रेण कार्यक्रमस्य समापनम् अकरोत् ।अस्मिन् कार्यक्रमे श्रीप्रेमलोधः, अभिषेकसेनः, देवकरणः च सादरम् उपस्थिताः आसन् ॥

# युमनाम खेमचन्द सिंहः बुधवासरे मणिपुरराज्यस्य नूतन-मुख्यमन्त्रिपदे शपथं स्वीकृतवान्, मणिपुरस्य नूतन-सर्वकारस्य शपथग्रहण-समारोहः




**हिमसंस्कृतवार्ता**। पूर्व-विधानसभाध्यक्षः मन्त्री च युमनाम खेमचन्द सिंहः बुधवासरे मणिपुरराज्यस्य नूतन-मुख्यमन्त्रिपदे शपथं स्वीकृतवान्। तेन सह नेमचा किपगेन तथा लोसी दिखो इत्येतौ उपमुख्यमन्त्रिपदस्य शपथं गृहीतवन्तौ।नवदिल्ल्यां विधायकदलस्य नेता इति चितः युमनाम खेमचन्द सिंहः भाजपादलेन नियुक्तः। तदनन्तरं मणिपुरस्य राजभवने (लोक भवने) राज्यपालः अजय कुमार भल्ला नूतन-मुख्यमन्त्रिणे, द्वाभ्यां उपमुख्यमन्त्रिभ्यां अन्येभ्यः मन्त्रिभ्यः च पदस्य गोपनीयतायाः च शपथं कारितवान्।

**मन्त्रिमण्डलस्य सदस्याः**-शपथग्रहणे भाजपायाः नेमचा किपगेन, गोविन्ददास कोन्थौजम, नागा पीपुल्स फ्रण्ट् (NPF) दलस्य लोसी दिखो तथा राष्ट्रिय जन पार्टी दलस्य खुरैजाम लोकेन सिंहः च सम्मिलिताः आसन्। विशेषरूपेण नेमचा किपगेन महोदया नवदिल्ल्याः मणिपुर-भवनात् अन्तर्जाल-माध्यमेन (Online) उपमुख्यमन्त्रिपदस्य शपथं गृहीतवती।

**मन्त्रिमण्डल-विस्तारः**-युमनाम खेमचन्द सिंहस्य नेतृत्वे सर्वकारस्य मन्त्रिमण्डल-विस्तारः भविष्ये भविष्यति। सम्प्रति सप्त मन्त्रिणां पदानि रिक्तानि सन्ति।

**गणमान्य-अतिथयः**-अस्मिन् कार्यक्रमे भाजपायाः केन्द्रिय-पर्यवेक्षकः तरुण चुघः, संबित पात्रा, पूर्वमुख्यमन्त्री बीरेन सिंहः, विधानसभाध्यक्षः थोकचोम सत्यव्रत सिंहः, राज्य-भाजपाध्यक्षा शारदा देवी च उपस्थिताः आसन्।

**राष्ट्रपति-शासनस्य समाप्तिः**-केन्द्रसर्वकारेण बुधवासरे मणिपुरराज्यतः 'राष्ट्रपति-शासनम्' निष्कासितम्। केन्द्रिय-गृहसचिवेन गोविन्द मोहनेन जारीकृतायां अधिसूचनायां उक्तं यत्- "संविधानस्य अनुच्छेद ३५६ (२) इत्यस्य शक्तीनां प्रयोगं कृत्वा, राष्ट्रपतिः द्रौपदी मुर्मु महोदया १३ फरवरी २०२५ तः प्रवर्तमानं राष्ट्रपति-शासनं ४ फरवरी २०२६ दिनाङ्कतः निरस्तं करोति।" अनेन मणिपुरे एनडीए (NDA) सर्वकारस्य मार्गः प्रशस्तः जातः।

# ओलिम्पिक क्रीडिका ईशा सिंह इत्येषा एयर पिस्टल-स्पर्धायां स्वर्णपदकं प्राप्तवती



ओलिम्पिक क्रीडिका ईशा सिंह इत्येषा एशियन् राइफ़ल् एण्ड् पिस्टल चाम्पियन्शिप् स्पर्धायाः प्रथमे दिने देहल्याः डा. कर्णी सिंह शूटिङ्ग रेञ्ज इत्यत्र महिलानां व्यक्तिगत दशमीटर परीमिते एयर पिस्टल-स्पर्धायाः निर्णायक-स्पर्धायां स्वर्णपदकं प्राप्तवती।



## १) काश्चन साधुवाचः -०१

अति सर्वत्र वर्जयेत्।
अर्थात्, येषु केषु अपि कार्यव्यवहारादिषु अत्याचरणं वर्जनीयम्।
२) अरक्षितं तिष्ठति दैवरक्षितम्।
अर्थात्, यस्य रक्षितारो न केऽपि स्युः, तस्य रक्षक एकमात्रं परमेश्वरोऽस्ति।
३) आयादल्पतरो व्ययः।
अर्थात्, धनस्य आयतोऽपि व्ययो न्यूनीकर्तव्यः, यतोहि द्रव्यसञ्चयनम् अग्रिमकालस्य कृते हिताय कल्पते।
४) आपत्सु वैराणि समुद्भवन्ति।
-विपत्काले शत्रुता सर्वतो वर्धते इत्यर्थः।
५) ईप्सितं मनसः सर्वं कस्य सम्पद्यते सुखम्।
-मनसा कल्पितं यावत्सुखं, तावन्न केनापि प्राप्तुं, भोक्तुं वा शक्यते जीवने।
६) इन्द्रियजयस्य मूलं विनयः।
-मनुष्यस्य विनयगुणो महत्तमः, येन गुणेन स चञ्चलानि इन्द्रियाणि जेतुं शक्नुयात्, एतदतिरिच्य नान्योपायः।
७) उद्योगे नास्ति दारिद्र्यम्।
-कर्मरतस्य मनुष्यस्य जीवने दरिद्रता नायाति कदापि। कर्मविमुखो हि दरिद्रः, दीनो वा भवति।
८) उत्तमं स्वोपार्जितं धनम्।
-स्वेन एव सकष्टम् उपार्जितं धनम् अमृतवत् उत्तमं, पवित्रं च भवति। चौर्यधनं चेत् स्वस्यैव विनाशाय कल्पते। अतो द्रव्यशुद्धिः जीवने अत्यन्तम् आवश्यकी।
९) ऋजुस्वभावपरो जनेषु दुर्लभः।
-जगति प्रायशः कुटिलजना हि दृष्टिगोचरा भवन्ति। परन्तु सहज-सरलभावापन्नः, धर्मपरायणो वा जनो दुर्लभ एव स्यादित्याशयः।
१०) ऋणशेषः कर्तव्यम्।
-मनुष्यो देव-ऋणं, मनुष्य-ऋणं, पितृ-ऋणम् इत्यादिविविध-ऋणैः बाधमानो भवति। तेभ्यः ऋणेभ्यो मुक्तिं लब्धुं, सदैव मनुष्येण भगवच्चिन्तनं सत्कर्मादिकं कर्तव्यमिति।

✍ असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# "लौकिकन्यायकोशः"

## "महावातगजन्यायः"

कश्चन झञ्झावातः जातः चेत् महागजः अपि दूरे उत्पात्येत् तर्हि क्षुद्रजन्तूनां का कथा? एवं महताम् एव यत्र हानेः शक्यता अल्पसत्त्वानां कैमुतिकन्यायेन उपद्रवः अवश्यमेव भवति इति भावः। अयं कैमुतिकन्यायसदृशः न्यायः।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्


हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। प्रथमा वार्ता श्रूयताम्। चीनदेशे एकया महिला फेङ-शुई-दोषं दूरीकर्तुम् यातायात-दर्पणस्य दिशा परिवर्तिता।
**काव्या-** अनेन अन्ध-बिन्दुः निर्मितः, बहूनां वाहनानां दुर्घटना च जाता। आरक्षकैः सा तर्जिता।
**नन्दिनी-** अहो, अन्धविश्वासः जनान् आपदि पातयति। इदानीं 'स्टैनफोर्ड'-विश्वविद्यालयस्य छात्राः कुपिताः सन्ति।
**नन्दिनी-** तैः शाकाहारे मांसांशस्य स्पर्शः शङ्कितः। भोजनालये गोमांसस्य मिश्रणं जातं इति तैः भयम् प्रकटितम्।
**काव्या-** एतत् तु महत् पापम्। देहल्याम् अपरं विचित्रं वृत्तं दृष्टम्।
**काव्या-** एकया महिला भोजन-वितरकाय श्मशानस्य अन्तः आगन्तुम् आदेशः दत्तः। जनैः एतत् "नाटकम्" इति कथितम्।
**नन्दिनी-** अन्तर्जाल-प्रसिद्ध्यर्थं जनाः किमपि कुर्वन्ति। अन्ते, एकः कर्मचारी संस्थापकाय रुष्टः।
**नन्दिनी-** नियुक्ति-पूर्वमेव निष्कासनं निश्चितं भूतम् इति तेन ज्ञातम्। तेन "नैतिक-दारिद्र्यम्" इति आक्षेपः कृतः।
**काव्या-** अहो दौर्भाग्यम्।




# बालकथा

# चतुरः शशकः

## (चतुर खरगोश)

एकस्मिन् वने भासुरकः नाम सिंहः निवसति स्म। सः अतीव क्रूरः आसीत्। प्रतिदिनं सः बहून् मृगान् (पशून्) मारयति स्म। वनस्य सर्वे पशवः भीताः आसन्।
एकदा सर्वे पशवः मिलित्वा सिंहस्य समीपम् अगच्छन् अवदन् च— "मृगेन्द्र! भवान् प्रतिदिनं बहून् पशून् मारयति। एतेन अस्माकं वंशः नाशं गमिष्यति। अतः वयं प्रार्थनां कुर्मः यत् वयं स्वयं क्रमेण प्रतिदिनम् एकं पशुं भवतः भोजनाय प्रेषयिष्यामः।"
सिंहः अङ्गीकृतवान्। ततः प्रभृति प्रतिदिनम् एकः पशुः सिंहस्य समीपं गच्छति स्म।

### शशकस्य क्रमः (खरगोश की बारी)

कदाचित् एकस्य वृद्धस्य शशकस्य क्रमः समायातः। सः शशकः अतीव बुद्धिमान् आसीत्। सः चिन्तितवान्— "कथम् अहं स्वप्राणान् रक्षेयम्? कथं च तं दुष्टं सिंहं मारयेयम्?"
सः मार्गे मन्दं मन्दं चलन् सिंहस्य विनाशाय एकम् उपायं चिन्तितवान्। विलम्बेन सः सिंहस्य समीपम् अगच्छत्। सिंहः तु बुभुक्षया (भूख से) व्याकुलः आसीत्। सः क्रोधेन गर्जितवान्— "रे अधम! त्वं तु अतिलघुः असि, उपरि च विलम्बेन आगतवान्! अहं त्वां मारयित्वा श्वः (कल) सर्वान् पशून् हनिष्यामि।"

### शशकस्य चतुरता (खरगोश की चतुराई)

शशकः विनयेन अवदत्— "स्वामिन्! न मम दोषः, न च पशूनाम्। मार्गे अन्यः एकः सिंहः माम् मिलितवान्। सः अवदत् यत् 'अहम् अस्य वनस्य राजा'। सः मम पञ्च सहचरान् खादितवान्। सः माम् उक्तवान् यत् भवान् चौरः अस्ति। सः भवतः अपेक्षया (तुलना में) अधिकं बलवान् अस्ति।"
एतत् श्रुत्वा भासुरकः अत्यन्तं क्रुद्धः जातः। सः उच्चैः अगर्जत्— "कुत्र अस्ति सः दुष्टः? दर्शय माम्, अहं तं तत्क्षणं मारयिष्यामि।"
शशकः तं सिंहम् एकस्य गम्भीरस्य कूपस्य (कुएँ) समीपं नीतवान्। सः अवदत्— "स्वामिन्! पश्यतु, सः अत्रैव दुर्गे निवसति।"

### सिंहस्य विनाशः (सिंह का विनाश)

भासुरकः कूपस्य अन्तः अपश्यत्। तत्र जले सः स्वप्रतिबिम्बं (अपनी परछाईं) दृष्टवान्। सः चिन्तितवान् यत् सः एव द्वितीयः सिंहः अस्ति। सः तं प्रति उच्चैः अगर्जत्। कूपस्य अन्तः अपि प्रतिध्वनिः अभवत्। सिंहः अतीव क्रुद्धः सन् तं शत्रुमर्दनं कर्तुं कूपे अकुर्दत् (कूद गया)।
एवं सः दुष्टः सिंहः कूपे मग्नः सन् मृतः अभवत्।
उपसंहारः: बुद्धिमान् शशकः प्रसन्नचित्तेन वनं प्रत्यागतः। सर्वे पशवः तस्य बुद्धिवैभवं प्रशंसितवन्तः सुखेन च वसन्ति स्म।
**शिक्षा:** "बुद्धिर्यस्य बलं तस्य" (जिसके पास बुद्धि है, उसी के पास बल है)।



# हास्यकणिका

**पति**-पत्नी च (पति और पत्नी)
**पत्नी-** भो स्वामी! यदि अहं मरिष्यामि, तर्हि भवान् किं करिष्यति
**पतिः-** अहमपि मृतप्रायः भविष्यामि
**पत्नीः-** किमर्थं एवं वदति? किं भवान् मया सह प्राणत्यागं करिष्यति?
**पतिः-** न हि, न हि! अहं तु 'अतिप्रसन्नतया' मृतप्रायः भविष्यामि!

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्॥**
(अर्थः जो हमेशा बड़ों का सम्मान और सेवा करते हैं, उनकी आयु, विद्या, यश और बल ये चार चीजें बढ़ती हैं।)

- **अहिंसा परमो धर्मः।** (अहिंसा सबसे बड़ा धर्म है।)
- **बुद्धिर्यस्य बलं तस्य।** (जिसके पास बुद्धि है, उसी के पास बल है।)
- **लोभः पापस्य कारणम्।** (लोभ पाप का कारण होता है।)
- **शरीरमाद्यं खलु धर्मसाधनम्।** (शरीर ही सभी धर्मों/कर्तव्यों को पूरा करने का पहला साधन है।)